# U.G. 3rd Semester Examination - 2024

## SANSKRIT

## [MAJOR]

## Course Code : SANS-MJ-T-03

## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. संस्कृतेन देवनागरीलिप्या च यथारुचि **दश** प्रश्ना: समाधेया: :

2×10=20

i) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य नान्दीश्लोके कस्य देवस्य स्तुति: विहिता? देवस्य रूपस्य कति प्रकारा: वर्णिता:?

ii) कुलपति: शब्दस्य कोऽर्थ:?

iii) अभिज्ञानशकुन्तलनाटकस्य नान्दीश्लोके क: छन्द: उपलभ्यते?

iv) दुष्यन्तस्य सेनापतिमते मृगयाया: के गुणा: सन्ति?

v) अभिज्ञानशकुन्तलनाटके विदूषकस्य नाम किम्? कस्मिन् अङ्के तस्य प्रथमो आविर्भाव:?

vi) का आसीत् सानुमती? तस्यां कस्या: विद्याया: ज्ञानमासीत्?

vii) उदयनस्य वीणाया: नाम किमासीत्?

viii) टीकां लिखत — 'समुद्रगृह:'

ix) ब्रह्मचारीवृत्तान्त: कस्मिन् नाटके उपलभ्यते? नाट्यकार: क:?

x) का आसीत् पद्मावती? कथं सा तपोवने पदार्पणमकरोत्?

xi) क: आसीत् मारीच:? कस्मिन् अङ्के स दृश्यते?

xii) क: आसीत् यौगन्धरायण:? तस्य क: अभिसन्धि: आसीत्?

*[Turn over]*

xiii) स्वप्नवासवदत्तम् इति नाटकस्य नान्दीश्लोकं लिखत।

xiv) भ्रमरवृत्तान्त: कस्य नाटकस्य कस्मिन् अङ्के दृश्यते?

2. यथामति सुरगिरा वङ्गभाषया आङ्गलभाषया वा **चत्वार:** प्रश्ना: समाधेया: : 5×4=20

i) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य: —

a) नीवारा: शुकगर्भकीटरमुखभ्रष्टास्तरूणामध:,
प्रस्निग्धा: क्वचिदिङ्गुदीफलभिद: सूच्यन्त एवोपला:।
विश्वासोपगमादभिन्नगतय: शब्दं सहन्ते मृगा—
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किता:।।

b) अभिजनवतो भर्तु: श्लाघ्ये स्थिता गृहिणीपदे।
विभवगुरुभि: कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।।

ii) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य: —

a) नैवेदानीं दु:खिताश्चक्रावाका नैवाप्यन्ते स्त्रीविशेषैर्वियुक्ता:
धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृखेदात्सा दुग्धाप्यदुग्धा।।

b) उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम्।
विकीर्णवाणोग्रतरङ्गभंङ्गे महार्णवाभे युधि नाशयामि।।

iii) स्वप्नवासवदत्तां नाटकमवलम्व्य ब्रह्मचारीवृत्तान्तं तस्य तात्पर्यं वा संक्षेपेण लिखत।

iv) अभिज्ञानशकुन्तलनाटके धीवरवृत्तान्तस्य नाटकीयतात्पर्यं विवृणुत।

v) अभिज्ञानशकुन्तलनाटके सूत्रधारेण सह नट्या: कथोपकथनं लिखत।



3. i) यथेच्छ**मेकस्य** सुरगिरा देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या : 6×1=6

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तु:।
तच्चेतसा स्मरति नूनमवोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि।।

**अथवा**

सुखमर्थो भवेद्दातुं सुखं प्राणा: सुखं तप:।
सुखमन्यद् भवेत् सर्वं दु:खं न्यासस्य रक्षणम्।।

ii) यथेच्छ**मेकस्या:** पङ्क्ते: भावसम्प्रसारणं कार्यम्, सरलसुरगिरा देवनागरीलिप्या च कार्या : 4×1=4

न प्रभातरल्यं ज्योतिरुदेति वसुधातलात्।।

**अथवा**

चक्रारपङ्क्तिरिव गच्छति भाग्यपंङ्क्ति:।।

iii) यथेच्छं **एक:** प्रश्न: समाधेय: : 10×1=10

a) दुर्वासस: अभिशापवृत्तान्तस्य नाटकीयतात्पर्यं प्रतिपादयत।

b) भासस्य रचनाशैली प्रतिपादयत।

c) अभिज्ञानशकुन्तलनाटके चतुर्थ-पञ्चमाङ्कयोर्मध्ये श्रेष्ठतरं विचार्य (तव मते) तदङ्कस्य वर्णना कार्या।